**तालुचर** पुंस्त्री० तलुचरर्षेर्गोत्रापत्यं गर्गा० यञ् । तलुचरर्षेरपत्ये स्त्रियां लोहि० ष्फ षित्त्वात् ङीष् । तालुचरायणी ।

**तालुजिह्व** पुंस्त्री तालु एव जिह्वा यस्य । १कुम्भीरे हेम० । तस्य जिह्वाशून्यत्वेऽपि तालुनैव रसास्वादनात्तथात्वम् । स्त्रियां टाप् ।

**तालुपाक** पु० सुश्रुतोक्ते तालुगते रोगभेदे । तालुगतास्तु गलशुण्डिका तुण्डिकेर्य्यध्रुषो मांसकच्छपोऽर्वुदं मांससङ्घातस्तालुपुप्पुटस्तालुशोषस्तालुपाक इति । "श्लेष्मासृग्भ्यां तालुमूलात्प्रवृत्तो दीर्घः शोफो ध्मातवस्तिप्रकाशः । तृष्णाकासश्वासकृत् सम्प्रदिष्टो व्याधिर्वैद्यैः कण्ठशुण्डीति नाम्ना । शोफः स्थूलस्तोददाहप्रपाकी प्रागुक्ताभ्यां तुण्डिकेरी मता तु । शोफः स्तब्धो लोहितस्तालुदेशे रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्यः । कूर्म्मोत्सन्नोऽवेदनोऽशीघ्रजन्मा रक्तो ज्ञेयः कच्छपः श्लेष्मणा स्यात् । पद्माकारं तालुमध्ये तु शोफं विद्याद्रक्तादर्बुदं प्रोक्तलिङ्गम् । दुष्टं मांसं श्लेष्मणा नीरुजञ्च ताल्वन्तस्थं मांससङ्घातमाहुः । नीरुक् स्थायी कोलमात्रः कफात्स्यान्मेदोयुक्तात्पुप्पुटस्तालुदेशे । शोषोऽत्यर्थं दीर्य्यते चापि तालु श्वासो वातात्तालुशोषः स पित्तात् । पित्तं कुर्य्यात्पाकमत्यर्थघोरं तालुन्येनं तालुपाकं वदन्ति" तेषां लक्षणान्युक्तानि । [दृश्यम् ।

**तालुपुप्पुट** पु० सुश्रुतोक्ते तालुगतरोगभेदे तालुपाकशब्दे

**तालुशोष** पु०सुश्रुतोक्ते तालुरोगभेदे तालुपाकशब्दे दृश्यम् ।

**तालूर** पु० चु० तल–बा० ऊर । आवर्त्ते हेमच० ।

**तालूषक** न० तल–बा० ऊषक । तालुनि । "अन्ततालूषके श्रोणीफलके च विनिर्दिशेत्" याज्ञ० "तालूषकं ककुदम्" मिता० ।

**तावक** त्रि०तवेदम् युष्मद्+अण् एकवचने तवकादेशः । त्वत्सम्बन्धिनि स्त्रियां ङीप् । "स्वर्गं तत्ते तावकेभ्यो रथेभ्यः" ऋ० १।९४।११ । "तपः क्व वत्से ! क्व च तावकं वपुः"कुमा० । [त्वत्सम्बन्धिनि ।

**तावकीन** त्रि० तवेदम् युष्मद्+खञ् एकवने तवकादेशः ।

**तावच्छस्** अव्य० तावत्+संख्यासंज्ञत्वात् वीप्सार्थे+शस् । तावत्तावत्प्रकारे "यावच्छो वै रसः शिल्पस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्रजायते" तै० स० ।

**तावत्** अव्य० तद्+बा० डावत् । १साकल्ये २अवधौ ३माने ४अवधारणे अमरः ५प्रशंसायाम् ६पक्षान्तरे शब्दरत्ना० ७संग्रामे ८अधिकारे च मेदि० । ९तदेत्यर्थे शब्दार्थचि० । "भर्त्तापि तावत् क्रथकैशिकानाम्" रघुः तावत् तदेत्यर्थः । साकल्ये "तावत्प्रकीर्णाभिनवोपचारम्" अवधौ "वलगु न सम्भावित एव तावत्" रघुः "तावत् आलोकमार्गप्राप्तिपर्य्यन्तम्" मल्लि० । मानार्थे "त्वमेव तावत् परिचिन्तय स्वयम्" कुमा० तावत् इति मानार्थे "यावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः" मल्लि० । अवधारणे "इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः" माघः । "मा कारि तावत् न क्रियतामेवेत्यर्थः" मल्लि० । तत्परिमाणमस्य तद्+वतुप् "आ सर्वनाम्नः"पा० आ । १०तत्परिमाणविशिष्टे त्रि० । "यावानर्थ उदपाने सर्वतः संप्लुतोदके । तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः" गीता "जम्बुद्वीपोऽयं तावत्प्रमाणविस्तारस्तावता क्षीरोदधिना वेष्टितः" भाग० ५।२०।२ । क्रियाविशेषणत्वे न० । "पुरोऽस्य यावन्न भुवि व्यलीयत । गिरेस्तडित्वानिव तावदुच्चकैः" माघः । स्त्रियां ङीप् "यावती संभवेद्वृत्तिस्तावती दातुमर्हति" मनुः । अस्य वत्वन्तत्वात् संख्यावत् कार्य्यं तावच्छः तावत्कः तावतिकः ।

**तावतिक** त्रि० तावता क्रीतः संख्यात्वात् कन् "वतोरिड् वा" पा० वा इट् । तत्परिमाणवता क्रीते । पक्षे इडभावे तावत्क तत्रार्थे ।

**तावतिथ** त्रि० तावतां पूरणः डट् । "वतोरिथुक्" पा० इथुक् । तावतां पूरणे । "यावत् सामिधेनि वेदेदमहं तावतिथेन वर्जयेति" कात्या० श्रौ० ३।१।९ ।

**ताविष** पु० "तवेर्णिद्वा" उणा०टिषच् । स्वर्गादौ तविषशब्दार्थे तविषशब्दे दृश्यम् ।

**तावुरि** पु० वृषराशौ कौर्पशब्दे २२७८ पृ० दृश्यम् ।

**तासुन** पु० तस–बा० उनण् । शणवृक्षे । तस्येदम् अण् । तासुन तत्सम्बन्धिनि स्त्रियां ङीप् । "शुक्लकाशतासुन्यो रसनाः" ज्यो० त० गोभिलः । "मुञ्जः शरः तासुनः शणस्तद्भवा रसना मेखला तासुनी" ।

**ति** अव्य० इति+वेदे पृषो० । इतिशब्दार्थे । "स होवाचास्तीह प्रायश्चित्तिरित्यस्तीति का ति पिता ते वेदेति" शत० ब्रा० ११।६।१।१ । का प्रायश्चित्तिस्ति इति प्रश्नः ।

**तिक** गतौ भ्वा० आत्म० सक०सेट् । तेकते अतेकिष्ट ऋदित् णिच् अतितेकत् त । तितेके । [अतेकीत् । तितेक ।

**तिक** आस्कन्दे वधे च स्वा० पर० सक० सेट् । तिक्नोति